SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 30/07/2024
Volume – 6
Issue – 1
(ISSN ONLINE:- 2583-7176)
https://samvardhini.in

# भारतीयज्ञानपरम्परायां प्रारम्भिक-बाल्यावस्थासंरक्षणं

Battu Bhargava Sai
Prof Shridhar Bhat

**शोधसार:**

"शैशवे अभ्यस्तविद्यानां, यौवने विषयैषिणाम्" इति कविकुलगुरोः कालिदासस्य वचनं बाल्ये एव विद्याधनत्वं सत्यापयति । अत्रापि बोधनप्रकाराणां दर्शनशास्त्रपरम्परायां महत्वम् प्रतिपादितम् । एवं प्राचीनप्रबोधनविधिना माणवकः सुसंस्कारसम्पन्नो भवति । अनेन प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठिता भवति इति ऐतरेयोपनिषदुक्तप्रकारेण तद्धितपःतद्दितपः सिद्ध्यति ।

**कूटशब्दः -**

१. दक्षो भवति ।
२. महान् भवति ।
३. शब्दग्राही पटुमान् भवति ।
४. धीरो बुद्धिमान् व्यवहारकुशलो चतुरो भवति ।
५. शैशवे अभ्यस्त विद्यानाम् ।

**Author :-**
**Battu Bhargava Sai**
Research Scholar
Department of Sanskrit and Vedic Studies
Sri Sathya Sai University for Human Excellence, Kalaburagi
Email : - bhargava.sai@ssslsg.org

**Prof. Shridhar Bhat**
Professor
Department of Sanskrit and Vedic Studies
Sri Sathya Sai University for Human Excellence, Kalaburagi
Email :- shridhar.bhat@sssuhe.ac.in

## प्रस्तावना

सनातनभारतीयसाहित्ये आम्नायस्य स्थानम् सर्वोपरि वर्तते । भारतीयसनातनधर्मव्यवस्था वेदायत्ता एव । वेदमाता एव सत्यधर्मनिरुपणे स्वतन्त्रभावेन प्रमाणं प्रदर्शयति । कदाचित् श्रुतिस्मृतिविरोधे सति तत्र श्रुतिरेव गरीयसी । स च वेदः एव भारतशब्दस्य भारतीयत्वम् प्रतिपादयति । तद्यथा –

**"भाति सर्वेषु वेदेषु रतिः सर्वेषु जन्तुषु ।**
**तरति आत्मशोकान् भारतमित्यभिधीयते ॥" इति ।**

"वेदः सर्वज्ञानमयो हि सः" इति मनुना उक्तम् । इयं प्राचीना उक्तिः । 'भा' नाम प्रकाशः, कस्य प्रकाशः इत्युक्तौ वेदस्य अर्थात् ज्ञानराशेः प्रकाशः । आपस्तम्भश्रौतसूत्रे श्रूयते एवं मन्त्रब्राह्मणयोर्वेदनामधेयम् इति । "अपौरुषेयं वाक्यं वेदः" इति ।

ऋषिमुनिजनानाम् तपानुष्ठानसमये तेषामन्तरङ्गे प्रस्फुरती ज्ञानप्रभा। ते समाधौ ज्ञानचक्षुषा तत्वस्वरूपं अपश्यन्। वेदमन्त्रमहिमा साक्षात्कृतः आसन्। वेदवाङ्गमयेषु समस्तजीवजन्तूनां योगक्षेमरहस्यं सम्यगुपस्थापितम्। एकत्र श्रीशङ्करभगवत्पादाः अलिखन् स्वीये तैत्तिरीये भाष्ये। "सहस्रशो मातृवत् हितैषिणी" अस्मान् पालयति पोषयतीति सा श्रुतिः माता इति। "श्रुतिश्च नः प्रमाणम् अतीन्द्रियार्थविज्ञानोत्पत्तौ"1। "यथाभूतार्थवादित्वात् वेदस्य"2। "गर्भस्थ एव च वामदेवः प्रतिपेदे ब्रह्मभावम् इति वदन्ती जन्मान्तरे विद्योत्पत्तिं दर्शयति"3। "अनुभवरुढमेव च विद्याफलम् न क्रियाफलवत्"[4] इमामि बहूनि वचनानि वेदस्य महिमानम् उपवर्णयन्ति।

**शोधकार्यविवरणम्**

भारतीयानां सर्वेषाम् इदं द्योतते यद् सर्वजनेषु सर्वसात्विकविषयेषु रतिः। रतिः नाम प्रीतिः आदरता वा। अस्माकं पूर्वजानाम् इतिवृत्तं पश्यामश्चेत् तत्र ज्ञायते तेषां सूक्ष्मादृष्टिः। जीवजगदीश्वरविषये महानादरः तेषाम् आसीदिति। जननमरणमिमांसाविषये तैः अत्यन्तं सुक्ष्मेक्षिकया जागरुकतया च चिन्तितम्। संसारसागरात् कथम् उपरि आगन्तव्यम्। अस्माकं जीवनस्य उद्देश्यम् किम्। कथमस्माभिः प्रवर्तितव्यम् इति। तदर्थं महान् प्रयासो विहितः। वेदरहस्यम् अभ्युपगन्तुं वेदाङ्गानि रचयामासुः मनीषिणः। वेदोक्तस्य तत्वरहस्यस्य प्रकाशनाय बहूनि स्मृतिग्रन्थरत्नानि अलिखन् मुनयः। तेषु स्मृतिग्रन्थेषु समस्तस्य मनुकुलस्याभ्युदयाय बहुभिः मानवजीवनमौल्यप्रदोपदेशः सम्यगुपस्थापितः। तत्र समुपलभ्यमानप्रमाणबलेन एकस्याः व्यक्तेः समस्तस्य अवस्थाविशेषस्य संरक्षणार्थं किमस्माभिः कर्तव्यम् इति निगदितम्। तत्रत्य प्रमाणपुरस्सरं यथामतिरत्र प्रारम्भिकबाल्यावस्थासंरक्षणविधानम् निरुपयिष्यते।

तद्यथा-बाल्य-कौमाराद्यवस्थाविषयेषु तथा ब्रह्मचर्यगृहस्थाद्याश्रमविषयेषु च सम्यगुक्तम्। बाल्यम् नाम न स्तनन्दनत्वम्, न किशोरत्वम् वा अपि तु एकाऽवस्था। तस्याम् अवस्थायाम् अस्माभिः कथम् वा गुणादानरूपसंस्कारमारोपणीयं कथम् वा संस्थापनीयम्, दोषस्य अपनयनम् कथम् वा मार्जनीयम् इति।

श्री शङ्कराचार्याः स्वब्रह्मसूत्रभाष्ये अलिखन् एवम्। संस्कारो हि नाम – "संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा"5 इति। एवं विचार्यमाणे सति सनातनभारतीयधर्मपरम्परायाम् अयं विषयः मुख्यतया परिगणितः संस्काररूपेण वेदोपदेशोऽपि एवमेव समालक्ष्यते। "लोके धर्मिष्ठं प्रजा उपसर्पन्ति"। "धर्मेण पापमपनुदति। धर्मे सर्वम् प्रतिष्ठितम्। तस्मात् धर्मं परमं वदन्ति"6 इति। तदर्थं धर्मो विश्वस्य जगतः प्रतिष्ठा इत्युक्तम्। अर्थात् धर्म एव जगतः आधारस्तम्भः इति। किमर्थं धर्मेण विधृताः प्रजाः इत्युक्तौ भूतानाम् अहिंसार्थाय धर्मप्रवचनं कृतम् इति उत्तरम्। विद्वद्भिः सेवतः, सद्भिःनित्यम् अद्वेषरागिभिः हृदयेन अभ्यनुज्ञातः अयं धर्मः। न केवलं वेदे एवमुक्तं परमेष्ठिना ब्रह्मणा अपि एवमेव

[1] ब्र सू भा २-३-१
[2] बृ उ १-४-१०
[3] ब्र सू भा ३-४-५१
[4] ब्र सू भा ३-४-१५
[5] ब्र सू भा १-१-४
[6] य.वे तै.आ १० प्र.पा अनु ६३

कथितम् । तदर्थं "एष धर्मः सनातनः" इति निर्णीतं प्राज्ञैः । अहिंसा, सत्यमक्रोधः, तपः, दानं, दमः, मतिः, अनसूया, अमात्सर्यम्, अनीर्षा, इत्याद्याः धर्मस्य सनातनस्य सामान्यलक्षणानि भवन्ति । पुनरपि दशकं धर्मलक्षणम् इत्युक्तम् ।

तद्यथा –

**"धृतिः क्षमादमोऽस्तेयं शौचमिन्द्रियनिग्रहम् ।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥" इति ।**
**"एवं वेदस्मृतिसदाचारः स्वस्य च प्रियमात्मनः ।**
**एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्   ॥" इति ।**

यदि धर्मजिज्ञासा क्रियते यत्र, तत्र परमं प्रमाणं श्रुतिरेव हि । श्रुतिस्तु वेदो विज्ञेयः धर्मशास्त्रं तु वै स्मृतिः इत्यादीनि स्मृतिवचनानि अत्र परमप्रमाणानि भवन्ति ।

मनु-याज्ञवल्क्य-हारित-वसिष्ठप्रभृतयो महामनीषिणः स्वीयग्रन्थेषु वेदार्थनिर्णयं प्रतिपादयामासुः । तस्मात्  वेदोक्तो धर्म एव अनुष्ठेयः, नान्यथा । एवम् मानवः श्रुति-स्मृति-उदितं धर्ममनुतिष्ठति सः **कीर्तिमान् भवति** स एव परमसुखी जगतीतले । एवम् श्रुतिस्मृत्युक्तकर्माचरणद्वारा एव मानवः अभ्युदयनिःश्रेयसफलमवाप्नोति ।

एवम् सनातनज्ञानपरम्पराः शास्त्रेषु सम्यग् विवेचिता वर्तन्ते । "मातापितृगुरूणाम् च शुश्रूषा यत्र क्रियते सः अवश्यं त्रिषु लोकेषु यशः प्राप्य सुमहत्फलं विन्दते" इयं परम्परा अस्माकम् । तत्र समष्टिदृष्ट्या बालानां संस्कारः, विद्यार्जवपाटवत्वं सुस्पष्टतया निर्धारितम् । तेन मार्गेण यः पुमान् जिगमिषति सः मेधावान्, प्रज्ञावान् भूत्वा लोकसंग्रहकर्मणि समर्थो भवति, अर्थात् **दक्षो भवति** । बाल्ये एव तेन धर्मस्य तत्वरहस्यं ज्ञातव्यम् । यदा सम्यग्शास्त्रार्थतत्वम् अभ्युपगच्छति तदा सः एव "मनुष्यत्वं, मुमुक्षत्वम्, महापुरुषसंश्रयत्वम्"7 च अवाप्नोति । तद्वारा कीर्तिं सुखं च प्राप्य आदर्शपुरुषो भवति । इति तु शास्त्रोक्तव्यवस्था यन्मया उपस्थापिता ।

परम्  इतः लौकिकदृष्ट्या तु केचन विषयाः अनूद्यन्ते । तद्यथा - यद्यपि मानवः मतिमान् इति वयम् जानीमः । तथापि तस्य मतिः सुक्ष्मातिसूक्ष्मविषयेषु न प्रवर्तते । बाह्यदृष्ट्या भीतो अर्जुनः स्वस्वामिनम् भगवन्तम् वासुदेवम् यदा प्रार्थयति । "तदा भगवान् दिव्यम् ददामि ते चक्षुः.....पश्य मे योगमैश्वरम्"8 इति कथयति । अनेन किं ज्ञायते? इत्युक्त्वौ बाह्यरूपमवलम्ब्य यत् क्रियते तदल्पमेव, तदपेक्षया अन्तःचक्षुषा साधयितुं शक्नोति, तदा **सः महान् भवति** । अत्र नचीकेत-ध्रुव-प्रह्लाद-मार्कण्डेय-एकलव्यप्रभृतयः प्रमाणम् । तेषां कथा प्रसिद्धा, इतिहास एव इति । द्वापरान्ते भगवान् कृष्णद्वैपायनो नाम व्यासः वेदान् चातुर्धा विव्यास । स्वशिष्यान् आहूय तेभ्यः क्रमशः चतुर्वेदान् पैलवैशंपायनजैमिनिसुमन्तुप्रभृतिभ्यः उपदिदेश । तदारभ्य लोके लिपिविज्ञानस्य प्रादुर्भावः समजनि । अत्रत्य अधीतिविधानं वयं किञ्चित् पश्यामश्चेत्, तदा ज्ञायते अस्माकं शास्त्रीयपरिकल्पना कथमासीदिति । ते च विधिविशेषाः शास्त्रेषु प्रसिद्धास्सन्ति । आदौ श्रवणविधिः । बाल्ये कौमारे च अयं विधिः सम्यगनुष्ठीयते गुरुपरम्परासु । अत्र श्रवणम् आम्नायस्य यथारूपश्रवणं भवति, तथा वस्तुतत्वनिर्धारणम् भवति, अर्थानुसन्धानपूर्वकम् शब्दग्रहणम्

[7] वि चू ३
[8] भ गी ११-८

च भवति। **शब्दग्राही पटुमान् भवति**। श्रवणविधेः सामर्थ्यम् बाल्ये एव। वस्तुविषयावधारणम् अनेन विधीयते। अत्र मन्त्रवर्णकानां कोशादिग्रन्थानां कण्ठस्थीकरणम् भवति। द्वितीयं तावत् मननम्। मननेन विषयाणां विवेचनं भवति। तृतीयो विधिः निदिध्यासनम् अधीतस्य शास्त्रस्य पुनःपुनः ध्यानम्, अनेन विषयविवेचनं चिन्तनं विधीयते। प्रश्नप्रतिवचनविधानम् उपनिषत्सु प्रसिद्धम्। एवमेव स्वाध्यायो अध्येतव्यः इति साक्षात् श्रुतिरेव आदिशति। वादविधिः अधीतस्य विषयस्य मुक्तचिन्तनम् अत्र क्रियते स्थूणानिखननन्यायेन। अनुकरणविधानम्, प्राकृतिकविधानम्, प्रयोगविधिः, सहवासविधिः, मार्गावलम्बनविधिः, शुश्रूषाविधानम्, तपानुष्ठानविधिः, अनुग्रहविधिः एवम् उपनिषदुक्तविधानानि बाल्ये एव माणवकं संस्करोति। अनेन सः **धीरो बुद्दिमान् व्यवहारकुशलो चतुरो भवति**।

**निष्कर्षः -**

परमपि ततः स्वमेधया प्रज्ञाबलेन च अध्यारोप-अपवादविधिना बोधनप्रकारेणापि बाल्ये छात्रवृत्तित्वं साधयति (सिद्ध्यति)। इदमेव "शैशवे अभ्यस्तविद्यानां, यौवने विषयैषिणाम्"[9] इति कविकुलगुरोः कालिदासस्य वचनं बाल्ये एव विद्याधनत्वं सत्यापयति। अत्रापि बोधनप्रकाराः दर्शनशास्त्रपरम्परायां महत्वम् अनुवदन्तिति। एवं प्राचीनप्रबोधनविधिना माणवकः सुसंस्कारसम्पन्नो भवति। अनेन प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठिता भवति इति ऐतरेयोपनिषदुक्तप्रकारेण तद्धि तपः तद्दि तपः सिद्ध्यति। अनेन वटुः पटुर्भवति, प्रज्ञावान्, मेधावान् च भवति।

एवम् अस्ति शैशवे भारतीयसंस्कारपरम्परा। इयम् ज्ञानविज्ञानपरम्परा अस्माकम् प्राचीनगुरुकुलेषु सुष्ठु सुरक्षितमासीत्। यदा पाश्चात्यानाम् आक्रमणम् भरतखण्डे अभूत् तदारभ्य इयं परम्परा नष्टा जाता। बहव्यः वेदशाखाः अस्तङ्गताः, अस्माकम् मेधा प्रज्ञाशक्तिरपि अपगता, ह्रासंगता च। अद्य भारतदेशे गुरुकुलस्य स्थापनं ग्रामे ग्रामे सम्पन्नं भवति चेत्, तदा एव बाल्ये संस्कारयुक्तविद्याभिवृद्धिः भवेत्। विकसितभारतं वयं दृष्टुकामो भवामः। यथा गृहनिर्माणावसरे पञ्चाङ्गस्य प्रतिष्ठापनम् दृढतया भवेत् तदा एव गृहस्य सौष्ठवं सिद्ध्येत्। माणवकानां कृते बाल्यावस्था सुसंस्कारदृष्ट्या च स्वर्णयुगवत् एव परिकल्पते। तस्मात् श्रीशङ्करभगवत्पादानां तैत्तिरीयभाष्यवचनानुसारेण शैशवे एव "विद्यायां सर्वेषां चाधिकारः"[10] भवतु इति परापरविद्यानगमाय योग्यगुरूनिकायं परिकल्पनीयम्। सः आचार्यः श्रोत्रियो भवितव्यः, विद्याविनयसम्पन्नो भूत्वा छात्रानध्यापयन् तैः सह एव तिष्ठेत्। स्वाध्यायप्रवचनविधानाभ्यामनुशास्ति। भारतस्य नूतनशिक्षाविधानेषु इयम् प्रक्रिया अनुष्ठीयते चेत् तदा प्रपञ्चे भारतः गुरुत्वं गौरवं च प्राप्नुयात्। सुरसरस्वत्याः सततसमाराधकानाम् अस्माकम् भारतीयतत्वविदाम् मनसि शैशवे एव वेदोपनिषदुक्तसंस्काररूपा शिक्षा पप्राधान्येन जागृता भवेद् इति पौनःपुन्यं विद्याधिदेवतां शारदापरमेश्वरीम् अभ्यर्थयामो वयम्। तदा अन्तरङ्गशुचित्व-बहिरङ्गसमत्वरूपशिक्षणप्रणाली सफला जागरूका भवेद् इति चिन्तयामो वयम्। जीयात् गीर्वाणभारती।

---

[9] रघुवंश - १.८

[10] तै उ शि.व ११

**सन्दर्भग्रन्थानुक्रमणिकः –**


| | | |
|---|---|---|
| १. | तै. उ. शि.व. | तैत्तिरीय उपनिषद् शिक्षावल्ली |
| २. | बृ. उ. | बृहदारण्यक उपनिषद् |
| ३. | ब्र. सू. भा. | ब्रह्मसूत्रभाष्यम् |
| ४. | भ. गी. | भगवद्गीता |
| ५. | य.वे. तै.आ. प्र.पा | यजुर्वेद तैत्तरीय आरण्यक प्रपाठक |
| ६. | र. व. | रघुवंशमहाकाव्यम् |
| ७. | वि. चू. | विवेकचूडामणिः |